## ८.३ सहायकाः ।

८.३.१




सः सुधाखण्डेन लिखति ।



अहं चरणेन ताडयामि ।



अहं चमसेन खादामि ।



सा हस्तेन वादयति ।

• **कृतिः–** शिक्षकः एकैकं शब्दं वदति । दन्तकूर्चः, चरणः, मार्जकः, दन्तः, कर्णः, स्यूतः, दीपः, सङ्गणकः, कलशः, तालः, खड्गः, बाणः इति शब्दानां योग्यरूपाणि छात्राः वदन्ति । यथा हस्तः–हस्तेन

८.३.२



सः यानेन गच्छति ।



अहं मुखेन वदामि ।



सा वस्त्रेण मार्जयति ।



मर्कटः व्यजनेन वीजयति ।

• **कृतिः–** शिक्षकः शब्दं वदति । नेत्रम्, वाहनम्, जलम्, वस्त्रम्, यन्त्रम्, व्यजनम्, पुस्तकम्, भाण्डम्, शस्त्रम् इति शब्दानां योग्यरूपाणि छात्राः वदन्ति । यथा नेत्रम्–नेत्रेण ।

८.३.३



सा मापिकया आलिखति ।



बालिका छुरिकया कर्तयति ।



माता वेल्लन्या रोटिकाः करोति ।



बालकः कूप्या दुग्धं पिबति ।

• **कृतिः–** शिक्षकः शब्दं वदति । रोटिका, पुस्तिका, कपाटिका, पेटिका, नलिका, उत्पीठिका, शर्करा, गुलिका, पुत्तलिका, कुञ्चिका, मार्जनी, अङ्गुली, पुनःपूरणी, अङ्कनी, कर्तरी, घटी इति शब्दानां योग्यरूपाणि छात्राः वदन्ति । यथा शाटिका–शाटिकया, नदी–नद्या ।

### भाषाभ्यासः

१. **वाक्यानि पूरयत ।**

१) महिला (द्रोणी) जलम् आनयति ।
२) बालकः (चमस) खादति ।
३) सा (हस्त) रोटिकां खादति ।
४) सः (दण्ड) ताडयति ।
५) सा (जल) मुखं प्रक्षालयति ।
६) अहं (कुञ्चिका) तालम् उद्घाटयामि ।

### ८.३.४ सह



मन्दारः निनादेन सह खेलति ।



शिक्षिका छात्रया सह श्लोकं पठति ।



नीला मोहिन्या सह पुस्तकं पठति ।

### ८.३.५ विना



मत्स्याः जलेन विना न जीवन्ति ।



बालकः लड्डुकेन विना किमपि न खादति ।



वृद्धः उपनेत्रेण विना न पठति ।

- **कृतिः–** शिक्षकः छात्रान् प्रश्नं पृच्छति, 'त्वं केन सह लिखसि/क्रीडसि/खादसि?' स्वमित्रस्य नाम योजयित्वा छात्रः उत्तरं वदति ।

**गायत! नन्दत!**



राम: याति
सीतया सह ।
कुत्र सः याति?
सरयूनदीम् ।।१।।

कृष्णः याति
राधया सह
कुत्र सः याति?
यमुनानदीम् ।।२।।

विठ्ठलः याति
रुक्मिण्या सह ।
कुत्र सः याति?
चन्द्रभागाम् ।।३।।

– शिशुगीतानि १ॲप् तः ।

### अनुस्वारस्य उच्चारणं लेखनं च ।

गंगा, रोमांचः, घंटा, दंतः, जंबूकः– इति शब्देषु अनुस्वारः समानः, परन्तु अनुस्वारस्य उच्चारणं न समानम्। तत्र किं कारणम्? अनुस्वारस्य परे यः वर्णः तदनुसारम् उच्चारणं भवति ।

यथा– गंगा

- अनुस्वारस्य परे 'ग'कारः । गकारः क वर्गे अस्ति । (क्, ख्, ग्, घ्, ङ्)
- क वर्गस्य अनुनासिकम् ङ् इति ।
- अतः गंगा इति शब्दे अनुस्वारस्थाने वर्गीयस्य अनुनासिकस्य उच्चारणं भवति । गंगा = गङ्गा(गङ्गा)।

तथैव– रोमांचः– च्, छ्, ज्, झ्, **ञ्** = रोमाञ्चः (रोमाञ्चः)
घंटा – ट्, ठ्, ड्, ढ्, **ण्** = घण्टा (घण्टा)
दंतः – त्, थ्, द्, ध्, **न्** = दन्तः (दन्तः)
जंबूकः – प्, फ्, ब्, भ्, **म्** = जम्बूकः (जम्बूकः)

- अनुस्वारस्य परे अवर्गीय-वर्णः भवति तदा अनुस्वारः एव लेखितव्यः । यथा हंसः, संवादः

**योग्यम् अनुनासिकं योजयित्वा शब्दं पुनः लिखत ।** उदा. – अंजलिः– अञ्जलिः
मंदाकिनी, नागेंद्रः, शंका, पंच, कंपनम्, लंबितम्, भुजंगः, तांडवम्, संभ्रमः, चंद्रः, संख्या, नंदिनी, संततिः, अंबुजम्, मंडूकः, सिंचनम्, निंबः, कुंचिका, कंटकः